"श्वेतद्वीपे पुरा देव्याः क्रीडन्त्या रजसाप्लुतम् । दुकूलं तेन वस्त्रेण स्नातायाः क्षीरनीरधौ । प्रसृतं यद्रज स्तस्माद्गन्धकः समजायत" । तस्य भेदाः "चतुर्द्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः । रक्तो हेमक्रियासूक्तः पीतश्चैव रसायने । व्रणादिलेपने श्वेतः कृष्णः श्रेष्ठः स दुर्लभः । श्रेष्ठो हेमक्रियादिषु सर्वत्र प्रशस्तनर इत्यर्थः । अस्य गुणाः । गन्धकः कटुकस्तिक्तो वीर्य्योष्णस्तुवरः सरः । पित्तलः कटुकः पाके कण्डूविसर्पजन्तुजित् । हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः । अशोधितो गन्धक एष कुष्ठं करोति तापं विषमं शरीरे । सौख्यञ्च रूपञ्च बलं तथौजः शुक्रं निहन्त्येव करोति चाद्रम् । शोधितो यस्तु गन्धः स्यात् जराम्रत्युज्वरापहः । अग्निसन्दीपनः श्रेष्ठो वीर्य्यवृद्धिकरोऽस्थिकृत् । शोधनविधिस्तु । लोहपात्रे विनिःक्षिप्य घृतमग्नौ प्रतापयेत् । तप्ते घृते तत् समानं क्षिपेद्गन्धकजं रजः । विद्रुतं गन्धकं दृष्ट्वा तनुवस्त्रे विनिःक्षिपेत् । तथा वस्त्राद्विनिःसार्य्य दुग्धमध्येऽखिलं क्षिपेत् । एवं स गन्धकः शुध्येत् सर्वकर्मोचितो भवेत् ।" गन्धेन कायति कै—क । इति व्युत्पत्तिरित्यन्ये ।

**गन्धकचूर्ण** पु० गन्धकप्रधानश्चूर्णः । (वारुद) इति ख्याते पदार्थे शब्दार्थचि० ।

**गन्धकन्द** पु० गन्धप्रधानः कन्दोऽस्य । कसेरुवृक्षे वैद्य० ।

**गन्धकारिका** स्त्री गन्धं गन्धप्रधानं वेशादिकं करोति कृ—ण्वुल् कापि अत इत्वम् । परवेश्मस्थायां स्ववशायां वेशादिकारिकायाम् १सैरन्ध्र्यां हला० ।

**गन्धकाली** स्त्री प्रशस्तः गन्धस्तस्मै अलति पर्य्याप्नोति अल—अच् गौरा० ङीष् । सत्यवत्यां व्यासमातरि । "भीष्मः खलु पितुः प्रियचिकीर्षया सत्यवतीं मातरमुदवाहयत् यामाहुर्गन्धकालीमिति तस्यां पूर्वं कानीनो गर्भः पराशरात् द्वैपायनोऽभवत् । तस्यामेव शान्तनोरन्यौ द्वौ पुत्रौ बभूवतुः विचित्रवीर्य्यश्चित्राङ्गदश्च" भा० आ० ६१५ अ० । "अद्य त्वं जननीं भीष्म ! गन्धकालीं यशस्विनीम्" भा० हरि० २० अ० । गन्धवतीशब्दे दृश्यम् । स्वार्थे क । गन्धकालिकाऽप्यत्र हेमच० । [ २शम्बरचन्दने राजनि० ।

**गन्धकाष्ठ** न० गन्धयुक्तं काष्ठमस्य । १अगुरुचन्दने त्रिका० ।

**गन्धकुटी** स्त्री गन्धस्य कुटीवाधारः । १मुरानामगन्धद्रव्ये । अमरः ।

**गन्धकुसुमा** स्त्री गन्धयुक्तं कुसुमं यस्याः । (गणियारी) गणिकारीवृक्षे राजनि० ।

**गन्धकेलिका** स्त्री गन्धं केलति गच्छति केल—ण्वुल् कापि अत इत्वम् । १कस्तूर्य्यां मृगमदे राजनि० । गन्धप्रधानत्वात्तस्यास्तथात्वम् ।

**गन्धकोकिला** स्त्री गन्धप्रधाना कोकिलेव कृष्णत्वात् । "तीक्ष्णोष्णा कफहृत् तिक्ता सुगन्धा गन्धकोकिला" भावप्र० उक्तगुणके लतौषधिभेदे ।

**गन्धखेड़(ल)(क)** न० गन्धस्य खेला यत्र वा कप् डलयोरेकत्वात् । (वेणा)गन्धवति १भूतृणे रत्नमा० । कबन्तः तत्रार्थे न० शब्दरत्नावली ।

**गन्धचेलिका** स्त्री गन्धं चेलति गच्छति चेल—ण्वुल् कापि अत इत्वम् । १कस्तूर्य्यां मृगमदे त्रिका० ।

**गन्धजटिला** स्त्री गन्धेन जटिला । १वचायां(वच)रत्नमा० ।

**गन्धजल** न० गन्धाढ्यद्रव्यवासितं जलं शा० त० । गन्धाढ्यकुसुमादिपुष्पवासितजले "सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः" भाग० १।१।२।१२ ।

**गन्धजात** न० गन्धो व्यञ्जनादौ जातो यस्मात् निष्ठान्तात्वात् परनि० । (तेजपात) १तेजपत्रे शब्दरत्ना० । ६त० । २गन्धद्रव्यसंघे न० ।

**गन्धज्ञा** स्त्री गन्धं जानाति रसज्ञेत्यत्रेव करणस्य कर्त्तृत्वोपचारात् ज्ञा—कर्त्तरि क । १नासिकायाम् हेमच० ।

**गन्धतण्डुल** पु० गन्धप्रधानं तण्डुलमस्य । (वासमति) १शालिभेदे राजनि० ।

**गन्धतन्मात्र** न० सांख्यमतप्रसिद्धे शान्तघोरादिविशेषशून्यगन्धमात्रगुणके स्थूलपृथिव्यारम्भके सूक्ष्मपार्थिवांशे यथाह "स्थूलात् पञ्चतन्मात्रस्य" सा० प्र० सूत्रभाष्ये "तन्मात्राणि च यज्जातीयेषु शान्तादिविशेषत्रयं न तिष्ठति तज्जातीयानां शब्दस्पर्शरूपरसगन्धानामाधारभूतानि सूक्ष्मद्रव्याणि स्थूलानां हेतवोऽविशेषाः "तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता । न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः"इति विष्णुपुरादिभ्यः । अस्यायमर्थः तेषु तेषु भूतेषु तन्मात्रास्तिष्ठन्तीति कृत्वा धर्मधर्म्यभेदाद्द्रव्याणामपि तन्मात्रता स्मृता । ते च पदार्थाः शान्तघोरमूढाख्यैः स्थूलशब्दादिगतविशेषैः शून्या एकरूपत्वात् । तथा च शान्तादिविशेषशून्यशब्दादिमत्त्वमेव भूतानां शब्दादितन्मात्रत्वमित्याशयः । अतोऽविशेषिणोऽविशेषसंज्ञिता इति शान्तं सुखात्मकं